**B**

# Second Terminal Evaluation-2016

First Language Part I - Paper -I

**SANSKRIT**

(For Academic and Oriental Sanskrit Schools )

Class -X

Time - 1½ Hours | Total Score - 40

**निर्देशाः -**

- १५ निमेषाः समाश्वासकालः । प्रश्नान् पठितुम् उत्तराणि क्रमीकर्तुं च अयं कालः उपयोक्तव्यः।
- प्रश्नान् निर्देशान् च सम्यग् अवगम्य एव उत्तराणि लेखनीयानि ।
- उत्तरलेखने मूल्याङ्काः कालः च परिगणनीयाः।
- विवर्तनप्रश्नाद् ऋते सर्वेषां प्रश्नानाम् उत्तरलेखने देवनागरीलिपिरुपयोक्तव्या।

**1. कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत।** **4x1=4**

क) **" वेदान्तस्य धार्मिकता "** - इति ग्रन्थः केन विरचितम् ?

(डा. एस्.राधाकृष्णेन, बालगङ्गाधरतिलकेन, डा.एस्.रामचन्द्रेण)

ख) **" अक्ष्णोः समीपं "** इत्येतयोः समस्तपदं किम् ?

(समीक्ष्य, समक्षम्, सूक्ष्मम् )

ग) माघम् इति प्रसिद्धं काव्यम् ?

( शिशुपालवधम्, किरातार्जुनीयम्, कुमारसम्भवम् )

घ) येशुदेवस्य चरितं अधिकृत्य केरलीयमहाकविना विरचितं संस्कृतमहाकाव्यं किम् ?

(क्रिस्तुभागवतम्, नवभारतम्, केरलोदयम्)

**2. यथोचितं योजयत।** **4x1=4**

| | | |
|---|---|---|
| क) | निधिचालसुगमा - | दुष्यन्तः। |
| ख) | विद्वदौषधम् - | शिशुपालः । |
| ग) | पुरुवंशराजः - | कल्याणिरागः। |
| घ) | चेदिराजः - | नैषधम् । |



11/653/2016

**3. सर्वदमनम् अधिकृत्य सूचनानुसारं स्वभावनिरूपणं लिखत।** **1x4=4**

*सूचना-* दुष्यन्तपुत्रः ...... अभिज्ञानशाकुन्तलं नाटकं ...... चक्रवर्तिलक्षणयुक्तः ...... अबालसत्वः बालः ...... सिंहशिशुना सह क्रीडा ...... शकुन्तलावण्यम् ....... मातरं प्रति स्नेहः।

**4. अधोदत्तात् वाक्यात् क्त्वान्त- ल्यबन्त-तुमुन्नन्तरूपाणि विविच्य लिखत।** **1x3=3**

शिशुदिने छात्राः चित्राणि विलिख्य तेषु वर्णानि लेपनं कृत्वा प्रदर्शयितुं सन्नद्धाः अभवन्।

**5 प्रादेशिकभाषया लिखत।** **1x5=5**

केरलराज्ये बहुविधाः कलारूपाः सन्ति। कथाकेलिः, मोहिनियाट्टम्, कूटियाट्टम्, चाक्यार्कूत्त् इत्यादयः प्रसिद्धाः भवन्ति। एषु लास्यप्रधानं नृत्तरूपं भवति मोहिनियाट्टम्। अयं कलारूपः नाट्यशास्त्रनियमानुसारम् अवतार्यते। श्रृङ्गाररसप्रधानोऽयम् अस्वादकहृदयम् अत्यधिकम् आह्लादयति।

**6. खण्डिकां पठित्वा अधोदत्त प्रश्नानाम् उत्तराणि लिखत।** **5x1=5**

केरलीयः संस्कृतपण्डितः समूह्यपरिष्कर्ता च भवति पुन्नश्शेरी नीलकण्ठशर्मा। अयं पालक्काट् जिल्लायाः पट्टाम्बी जनपदे १८५८ तमे वर्षे जूण्मासस्य १७ दिने जनिम् अलभत। अस्य पितरौ नारायणशर्मा पाप्पिमनयम्मा च आस्ताम्। संस्कृतविद्याभ्यासप्रचारणाय 'सारस्वतोद्योतिनी' नाम संस्कृतपाठशालां स्थापितवान्। इदानीं पाठशालेयं पट्टाम्बी सर्वकारसंस्कृतकलालयः इति नाम्ना प्रवर्तते। विज्ञानचिन्तामणी नाम संस्कृतपत्रिकापि तेन प्रसिद्धीकृता।

क) सामूह्यपरिष्करणप्रवर्तनेषु निमग्नः केरलीयः संस्कृतपण्डितः कः आसीत् ?

ख) संस्कृतप्रचारणाय स्थापितायाः पाठशालायाः नाम किम् ?

ग) पुन्नश्शेरिशर्मणः पितरौ कौ ?

घ) ' **जन्म** ' इत्यर्थकं पदं खण्डिकातः चित्वा लिखत।

ङ) पुन्नश्शेरिशर्मणा प्रसिद्धीकृता संस्कृतपत्रिका का ?

**7. सम्भाषणांशान् पूरयत।** **4x1=4**

| | | |
|---|---|---|
| जानकी | - | अये पार्वति! ............. कथमासीत् ? |
| पार्वती | - | सखि ! विनोदयात्रा अतीव हृद्या अभवत् । |
| जानकी | - | ...................................... ? |
| पार्वती | - | यात्रासङ्घे ५० छात्राः दश अध्यापकाः च आसन् । |
| जानकी | - | ........................................ ? |
| पार्वती | - | तिरुवनन्तपुरे नियमसभामन्दिरं कोवलं च गतवन्तः। |
| जानकी | - | ........................................ ? |
| पार्वती | - | वयम् अद्य प्रभाते प्रत्यागतवन्तः। |

**8. सूचनानुसारं यदा -तदा उपयुज्य वाक्यं परिवर्तयत ।** **2x1=2**

उदा - भवान् भिक्षां ददाति। अन्यान् मा आह्वयतु ।

यदा भवान् भिक्षां ददाति तदा अन्यान् मा आह्वयतु ।

क) घोरातपः विद्यते। बहिः मा क्रीडतु ।

**9 . सूचनानुसारं जीवचरित्रं लिखत ।** **1x5=5**

| | | |
|---|---|---|
| नाम | - | डा. ए. पि. जे. अब्दुल्कलाम् |
| जन्मः | - | 1931 अक्तूबर् 15 |
| पितरौ | - | जैनलुब्दीन् आष्यम्मा च । |
| जन्मस्थानम् | - | तमिल्नाटु राज्ये रामेश्वरम्। |
| कर्ममण्डलम् | - | वैज्ञानिकः, प्रभाषकः, अध्यापकः च । |
| प्रशस्तिः | - | भारतस्य राष्ट्रपतिः । |
| कृतयः | - | ' विङ्स् ओफ् फयर् '। |
| पुरस्कारः | - | भारतरत्नं, पद्मभूषण्, पद्मविभूषण् |
| देहवियोगः | - | 2015 जूलै 27 |

**10 . उदाहरणानुसारं सन्धिच्छेदं लिखत।** **1x1=1**

**उदा-** यदि + एवम् - यद्येवम् ।

क) इत्येव - .......... + ........ ।

11. **उदाहरणानुसारम् एकपदं लिखत।** **1x1=1**

उदा- पार्वती - पर्वतस्य अपत्यं स्त्री ।

क) जानकी - .....................।

12. **अधोदत्तश्लोकस्य सूचनानुसारं गद्यक्रमं लिखत।** **1x2=2**

क) एवं वादिनि देवर्षौ
पार्श्वे पितुरधोमुखी।
लीलाकमलपत्राणि
गणयामास पार्वती ।।

**सूचनाः** - ........ एवं ........ पितुः ........ ....... ........ लीलाकमलपत्राणि ........ ।

*** *** ***